श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ पवमानसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ पवमानसूक्तम् ॥

हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्विन्द्रः॑।
अ॒ग्निं या गर्भं॑ दधि॒रे विरू॑पा॒स्तान॒ आप॒श्शग्ग्॒ स्यो॒न भ॑वन्तु॥

यासा॒ग्ं॒ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्यं॒ जना॑नाम्।
म॒धु॒श्चुत॒श्शुच॑यो॒ याः पा॑व॒कास्ता न॒ आप॒श्शग्ग्॒ स्यो॒ना भ॑वन्तु॥

यासां᳚ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा भव॑न्ति।
याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ शु॒क्रास्ता न॒ आप॒श्शग्ग्॒ स्यो॒ना भ॑वन्तु॥

शि॒वेन॑ मा॒ चक्षु॑षा पश्यतापश्शि॒वया॑ त॒नुवोप॑ स्पृशत॒ त्वचं॑ मे।
सर्वाग्ं॑ अ॒ग्नीग्ं॑ र॑प्सु॒षदो॑ हुवे वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ निध॑त्त॥

पव॑मान॒स्सुव॒र्जनः॑।
प॒वित्रे॑ण॒ विच॑र्षणिः।
यः पोता॒ स पु॑नातु मा॥

पु॒नन्तु॑ मा देवज॒नाः।
पु॒नन्तु॒ मन॑वो धि॒या।
पु॒नन्तु॒ विश्व॑ आ॒यवः॑॥

जात॑वेदः प॒वित्र॑वत्।
प॒वित्रे॑ण पुनाहि मा।
शु॒क्रेण॑ देव॒दीद्य॑त्।
अग्ने॒ क्रत्वा॒ क्रतू॒ग्ं॒ रनु॑॥

यत्ते॑ प॒वित्र॑म॒र्चिषि॑।
अग्ने॒ वित॑तमन्त॒रा।
ब्रह्म॒ तेन॑ पु॒नीमहे॥

उ॒भाभ्या᳚ं देवसवितः।
प॒वित्रे॑ण स॒वेन॑ च।
इ॒दं ब्रह्म॑ पु॒नीमहे॥

वै॒श्व॒दे॒वी पु॑न॒ती दे॒व्यागा᳚त्।
यस्यै॑ ब॒ह्वीस्त॒नु॒वो॑ वी॒तपृ॑ष्ठाः।
तया॒ मद॑न्तः सध॒माद्ये॑षु॒।
व॒यग्ग् स्या॑म॒ पत॑यो र॒यी॒णाम्॥

वै॒श्वा॒न॒रो र॒श्मिभि॑र्मा पु॒नातु॒।
वात॑ः प्रा॒णेने॑षि॒रो म॑यो॒ भू॒ः।
द्यावा॑पृथि॒वी पय॑सा॒ पयो॑भिः।
ऋ॒ताव॑री य॒ज्ञिये॑ मा पु॒नीताम्॥

बृ॒हद्भि॑ः सवित॒स्तृभि॑ः।
वर्षि॑ष्ठैर्दे॒वमन्म॑भिः।
अग्ने॒ दक्षै᳚ः पु॒नाहि मा॥

येन॑ दे॒वा अपु॑नत।
येनापो॑ दि॒व्यङ्कश॑ः।
तेन॑ दि॒व्येन॒ ब्रह्म॑णा।
इ॒दं ब्रह्म॑ पु॒नीमहे॥

यः पा॑वमा॒नीर॒ध्येति॑।
ऋषि॑भि॒स्संभृ॑त॒ग्ं रस᳚म्।

सर्व॒गं॒ स पू॒तम॑श्नाति।
स्व॒दि॒तं मा॑त॒रिश्व॑ना॥

पा॒व॒मा॒नीर्यो अ॒ध्येति॑।
ऋषि॑भि॒स्संभृ॑त॒गं॒ रस᳚म्।
तस्मै॒ सर॑स्वती दुहे।
क्षी॒रगं स॒र्पिर्मधू॑द॒कम्॥

पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः।
सु॒दुघा॒हि पय॑स्वतीः।
ऋषि॑भि॒स्संभृ॑तो॒ रस॑ः।
ब्रा॒ह्म॒णेष्व॒मृतगं॑ हि॒तम्॥

पा॒व॒मा॒नीर्दि॑शन्तु नः।
इ॒मं लो॒कमथो॑ अ॒मुम्।
कामा॒न्थ्सम॑र्धयन्तु नः।
दे॒वीर्दे॒वैः स॒माभृ॑ताः॥

पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः।
सु॒दुघा॒हि घृ॑त॒श्चुत॑ः।
ऋषि॑भि॒ः संभृ॑तो॒ रस॑ः।
ब्रा॒ह्म॒णेष्व॒मृतगं॑ हि॒तम्॥

येन॑ दे॒वाः प॒वित्रे॑ण।
आ॒त्मानं॑ पु॒नते॒ सदा᳚।
तेन॑ स॒हस्र॑धारेण।
पा॒व॒मा॒न्यः पु॑नन्तु मा॥

प्रा॒जा॒प॒त्यं प॒वित्र᳚म्।
श॒तोद्या॑मगं हि॒र॒ण्मय᳚म्।

www.prapatti.com

तेन॑ ब्रह्म॒ विदो॑ व॒यम्।
पू॒तं ब्रह्म॑ पु॒नीमहे॥

इन्द्र॑स्सुनी॒ती स॒हमा॑ पुनातु।
सोम॑स्स्व॒स्त्या वरु॑णस्स॒मीच्या॑।
य॒मो राजा॑ प्रमृ॒णाभि॑ः पुनातु मा।
जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु।
भूर्भुव॒स्सुव॑ः॥

तच्छं॒ योरावृ॑णीमहे।
गा॒तुं य॒ज्ञाय॑।
गा॒तुं य॒ज्ञप॑तये।
दैवी॑ स्व॒स्तिर॑स्तु नः।
स्व॒स्तिर्मानु॑षेभ्यः।
ऊ॒र्ध्वं जि॑गातु भेष॒जम्।
शन्नो॑ अस्तु द्विपदे॑।
शञ्चतु॑ष्पदे।
ओं शान्ति॒श्शान्ति॒श्शान्ति॑ः॥



www.prapatti.com